# Shri Shanmukha or AdhomukhasahasranamavaliH 6

# શ્રીષણ્મુખ અથવા અધોમુખસહસ્રનામાવલિઃ ૬

## Document Information

Text title : Shanmukha or adhomukhasahasranAmAvalI

File name : ShaNmukhaadhomukhasahasranAmAvalI.itx

Category : sahasranAmAvalI, subrahmanya

Location : doc_subrahmanya

Transliterated by : Sivakumar Thyagarajan shivakumar24 at gmail.com

Proofread by : Sivakumar Thyagarajan shivakumar24 at gmail.com

Description-comments : Subrahmanya stuti manjari p259+, pratimukhashaNmukasahasranAmAvalI

Latest update : November 2, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

# શ્રીષણ્મુખ અથવા અધોમુખસહસ્રનામાવલિઃ ૬

ૐ શ્રીગણેશાય નમઃ ।

અધોમુખપૂજા ।
(અકારાદિ ક્ષકારાન્તા)
ૐ અચિન્ત્ય શક્તયે નમઃ । અનઘાય । અક્ષોભ્યાય । અપરાજિતાય ।
અનાથવત્સલાય । અમોઘાય । અશોકાય । અજરાય । અભયાય । અત્યુદારાય ।
અઘહરાય । અગ્રગણ્યાય । અદ્રિજાસુતાય । અનન્તમહિમ્ને । અપરાય ।
અનન્તસૌખ્યદાય । અન્નદાય । અવ્યયાય । અનુત્તમાય । અક્ષયાય નમઃ । (૨૦)

ૐ અનાદયે નમઃ । અપ્રમેયાય । અક્ષરાય । અચ્યુતાય । અકલ્મષાય ।
અભિરામાય । અગ્રધુર્યાય । અમિતવિક્રમાય । અતુલાય । અમૃતાય ।
અઘોરાય । અનન્તવિક્રમાય । અનાથનાથાય । અમલાય । અપ્રમત્તાય ।
અમરપ્રભવે । અરિન્દમાય । અખિલાધારાય । અણિમાદિગુણાય ।
અગરણ્યે નમઃ । (૪૦)

ૐ અચઞ્ચલાય નમઃ । અમરસ્તુત્યાય । અકલઙ્કાય । અમિતાશનાય ।
અગ્નિભુવે । અનવદ્યાઙ્ગાય । અદ્ભુતાય । અભીષ્ટદાયકાય ।
અતીન્દ્રિયાય । અમેયાત્મને । અદૃશ્યાય । અવ્યક્તલક્ષણાય ।
આપદ્વિનાશકાય । આર્યાય । આઢ્યાય । આગમસંસ્તુતાય ।
આર્તસંરક્ષણાય । આદ્યાય । આનન્દાય । આર્યસેવિતાય નમઃ । (૬૦)

ૐ આશ્રિતેષ્ટાર્થવરદાય નમઃ । આનન્દિને । આર્તફલપ્રદાય ।
આશ્ચર્યરૂપાય । આનન્દાય । આપન્નાર્તિવિનાશનાય ।
ઇભવક્ત્રાનુજાય । ઇષ્ટાય । ઇભાસુરહરાત્મજાય ।
ઇતિહાસસ્તુતિશ્રુત્યાય (શ્રુતિસ્તુત્યાય)। ઇન્દ્રભોગફલપ્રદાય ।
ઇષ્ટાપૂર્તિ(ર્ત)ફલપ્રાપ્તયે । ઇષ્ટેષ્ટવરદાયકાય ।
ઇહામુત્રેષ્ટફલદાય । ઇષ્ટદાય । ઇન્દ્રવન્દિતાય । ઈડનીયાય ।
ઈશપુત્રાય । ઈપ્સિતાર્થપ્રદાયકાય । ઈતિહરાય નમઃ । (૮૦)

ૐ ઈડ્યાય નમઃ । ઈષણાત્રયવર્જિતાય । ઉદારકીર્તયે । ઉદ્યોગિને ।
ઉત્કૃષ્ટાય । ઉરુપરાક્રમાય । ઉત્કૃષ્ટશક્તયે । ઉત્સાહાય ।
ઉદારાય । ઉત્સવપ્રિયાય । ઉજ્જૃમ્ભાય । ઉદ્ભવાય । ઉગ્રાય ।
ઉદગ્રાય । ઉગ્રલોચનાય । ઉન્મત્તાય । ઉષ્ણશમનાય ।
ઉદ્વેગઘ્નાય । ઉરગેશ્વરાય । ઉરુપ્રભાવાય નમઃ । (૧૦૦)
ઉદીર્ણાય નમઃ । ઉમાસૂનવે । ઉદારધિયે । ઊર્ધ્વરેતસ્સુતાય ।
ઊર્ધ્વગતિદાયકાય । ઊર્જપાલકાય । ઊર્જિતાય । ઊર્ધ્વગાય ।
ઊર્ધ્વાય । ઊર્ધ્વલોકૈકનાયકાય । ઊર્જસ્વતે । ઊર્જિતોદારાય ।
ઊર્જિતોર્જિતશાસનાય । ઋજુકરાય । ઋજુરૂપાય ।
ઋષિદેવગણસ્તુત્યાય । ઋણત્રયવિમોચનાય ।
ઋતુભરાય । ઋજુપ્રીતાય નમઃ । (૧૨૦)

ૐ ઋષભાય નમઃ । ઋદ્ધિદેવાય । ઋચે । લુલિતોદારકાય ।
લુલિતભવપ્રાશપ્રભઞ્જનાય । એણાઙ્કધરસત્પુત્રાય ।
એકસ્મૈ । એનૌઘનાશનાય । ઐશ્વર્યદાય । ઐન્દ્રભોગિને ।
ઐન્દ્રીહાય । ઐન્દ્રીવિભૂતયે । ઓજસ્વિને । ઔષધિસ્થાનાય ।
ઓજોદાય । ઓદનપ્રિયાય । ઔદાર્યશીલાય । ઔમેયાય । ઔગ્રાય ।
ઔન્નત્યદાયકાય નમઃ । (૧૪૦)

ૐ ઔદાર્યાય નમઃ । ઔષધકારાય । ઔષધાય । ઔષધકરાય ।
અંશુમ્મતે । અંશુમ્માલાઢ્યાય । અમ્બિકાતનયાય । અન્નદાય ।
અન્ધકારિસુતાય । અન્ધત્વહારિણે । અમ્બુજલોચનાય । અસ્તમાયાય । અસ્પષ્ટાય ।
અમરાધીશાય । અસ્તોકપુણ્યદાય । અસ્તામિત્રાય । અસ્તરૂપાય ।
અસ્ખલત્સુગતિદાયકાય । કાર્તિકેયાય । કામરૂપાય નમઃ । (૧૬૦)

ૐ કુમારાય નમઃ । ક્રૌઞ્ચદારણાય । કામદાય । કારણાય । કામ્યાય ।
કમનીયાય । કૃપાકરાય । કાઞ્ચનાભાય । કાન્તિમુક્તાય । કામિને ।
કામપ્રદાય । કવયે । કીર્તિકૃતે । કુક્કુટધરાય । કૂટસ્થાય ।
કુવલયેક્ષણાય । કુઙ્કુમાઙ્ગાય । ક્લમહરાય । કુશલાય ।
કુક્કુટધ્વજાય નમઃ । (૧૮૦)

ૐ કૃશાનુસમ્ભાવાય નમઃ । ક્રૂરાય । ક્રૂરઘ્નાય । કલિતાપહૃતે ।
કામરૂપાય । કલ્પતરવે । કાન્તાય । કામિદાયકાય । કલ્યાણકૃતે ।
ક્લેશનાશનાય । કૃપાલવે । કરુણાકરાય । કલુષઘ્નાય ।

ક્રિયાશક્તયે । કઠોરાય । કવચિને । કુવિને । કોમલાઙ્ગાય ।
કુશપ્રીતાય । કુત્સિતઘ્નાય નમઃ । (૨૦૦)

ॐ કલાધરાય નમઃ । ખ્યાતાય । ખેટતરાય । ખડગિને । ખટ્વાઙ્ગિને ।
ખલનિગ્રહાય । ખ્યાતિપ્રદાય । ખેચરેશાય । ખ્યાતેહાય ।
ખેચરસ્તુતાય । ખરતાપહરાય । ખસ્થાય । ખેચરાય ।
ખેચરાશ્રયાય । ખણ્ડેન્દુમૌલિતનયાય । ખેલાય । ખેચરપાલાય ।
ખસ્થલાય । ખણ્ડિતાર્કાય । ખેચરીજનપૂજિતાય નમઃ । (૨૨૦)

ॐ ગાઙ્ગેયાય નમઃ । ગિરિજાપુત્રાય । ગણનાથાનુજાય । ગુહાય । ગોપ્ત્રે ।
ગીર્વાણ સંસેવ્યાય । ગુણાતીતાય । ગુહાશ્રયાય । ગતિપ્રદાય ।
ગુણનિધયે । ગમ્ભીરાય । ગિરિજાત્મજાય । ગૂઢરૂપાય । ગદાહરાય ।
ગુણાધીશાય । ગુણાગ્રણ્યે । ગોધરાય । ગહનાય । ગુપ્તાય ।
ગર્વઘ્નાય નમઃ । (૨૪૦) ગુણવર્ધનાય નમઃ । ગુહ્યાય । ગુણજ્ઞાય ।
ગીતજ્ઞાય । ગતાતઙ્કાય । ગુણાશ્રયાય । ગદ્યપદ્યપ્રિયાય ।
ગુણ્યાય । ગોસ્તુતાય । ગગનેચરાય । ગણનીય ચરિત્રાય ।
ગતક્લેશાય । ગુણાર્ણવાય । ઘૂર્ણિતાક્ષાય । ઘૃણાનિધયે ।
ઘનગમ્ભીરઘોષણાય । ઘણ્ટાનાદપ્રિયાય । ઘોરાઘૌઘનાશનાય ।
ઘનપ્રિયાય । ઘનાનન્દાય નમઃ । (૨૬૦)

ॐ ઘર્મહન્ત્રે નમઃ । ઘ્રુણાવતે । ઘૃષ્ટિપાલકાય ।
ઘૃણિને । ઘ્રુણાકારાય । ઘોષાય । ઘોરદૈત્યપ્રહારકાય ।
ઘટિતૈશ્વર્યસન્દોહાય । ઘનાર્થિને । ઘનવિક્રમાય ।
ચિત્રકૃતે । ચિત્રવર્ણાય । ચઞ્ચલાય । ચપલદ્યુતયે ।
ચિન્મયાય । ચિત્સ્વરૂપાય । ચિદાનન્દાય । ચિરન્તનાય ।
ચિત્રચેલાય । ચિત્રધરાય નમઃ । (૨૮૦)

ॐ ચિન્તનીયાય નમઃ । ચમત્કૃતયે । ચોરઘ્નાય । ચતુરાય ।
ચારવે । ચામીકરવિભૂષણાય । ચન્દ્રાર્કકોટિસદૃશાય ।
ચન્દ્રમૌલિતનૂભવાય । છાદિતાઙ્ગાય । છદ્મહન્ત્રે ।
છેદિતાખિલપાતકાય । છેદીકૃતતમઃ ક્લેશાય ।
છત્રીકૃતમહાયશસે । છાદિતાશેષસન્તાપાય ।
છરિતામૃતસાગરાય । છન્નત્રૈગુણ્યરૂપાય । છાતેહાય ।
છિન્નસંશયાય । છન્દોમયાય । છન્દોગામિને નમઃ । (૩૦૦)

ૐ છવિચ્છદાય નમઃ । જગદ્ધિતાય । જગત્પૂજ્યાય । જગજ્જ્યેષ્ઠાય ।
જગન્મયાય । જનકાય । જાહ્નવીસૂનવે । જિતામિત્રાય । જગદ્ગુરવે ।
જયિને । જિતેન્દ્રિયાય । જૈત્રાય । જરામરણવર્જિતાય ।
જ્યોતિર્મયાય । જગન્નાથાય । જગજ્જીવાય । જનાશ્રયાય ।
જગદ્વન્દ્યાય । જગચ્છ્રેષ્ઠાય । જિતક્લેશાય નમઃ । (૩૨૦)

ૐ જગદ્વિભવે નમઃ । જગત્સેવ્યાય । જગત્કર્ત્રે ।
જગત્સાક્ષિણે । જગત્પ્રિયાય । જમ્ભારિવન્દ્યાય । જયદાય ।
જગજ્જનમનોહરાય । જગજાડ્યાપહારકાય । જગદાનન્દજનકાય ।
જપાકુસુમસઙ્કાશાય । જનલોચનશોભનાય । જનેશ્વરાય ।
જગદ્વન્દ્યાય । જનજન્મસનિબર્હણાય । જયદાય । જન્તુતાપઘ્નાય ।
જિતદૈત્યમહાવ્રજાય । જિતાય । જિતક્રોધાય નમઃ । (૩૪૦)

ૐ જિતદમ્ભાય નમઃ । જનપ્રિયાય । ઝઞ્ઝાનિલમહાવેગાય ।
ઝરિતાશેષપાતકાય । ઝર્ઝરીકૃતદૈત્યૌઘાય ।
ઝલ્લરીવાદ્યસુપ્રિયાય । જ્ઞાનમૂર્તયે । જ્ઞાનગમ્યાય । જ્ઞાનિને ।
જ્ઞાનમહાનિધયે । ટઙ્કારનિત્યવિભવાય । ટઙ્કિતાખિલલોકાય ।
ટઙ્કિતૈનસ્તમોરવયે । ડમ્ભરપ્રભવે । ડમ્ભાય ।
ડમડ્ડુમરુકપ્રિયાય । ડમરોત્કટજાણ્ડજાય । ઢક્કાનાદપ્રિયાય ।
(ઢુ)લુલિતાસુરસદલાય । ઢાકિતામરસન્દોહાય નમઃ । (૩૬૦)

ૐ દુણ્ડિવિઘ્નેશ્વરાનુજાય નમઃ । તત્ત્વજ્ઞાય । તત્ત્વગાય । તીવ્રાય ।
તપોરૂપાય । તપોમયાય । ત્રયીમયાય । ત્રિકાલજ્ઞાય । ત્રિમૂર્તયે ।
ત્રિગુણાત્મકાય । ત્રિદશેશાય । તારકારયે । તાપઘ્નાય ।
તાપસપ્રિયાય । તુષ્ટિદાય । તુષ્ટિકૃતે । તીક્ષ્ણાય । તપોરૂપાય ।
ત્રિકાલવિદે । સ્તોત્રે નમઃ । (૩૮૦)

ૐ સ્તવ્યાય નમઃ । સ્તવપ્રીતાય । સ્તુતયે । સ્તોત્રાય । સ્તુતિપ્રિયાય ।
સ્થિતાય । સ્થાયિને । સ્થાપકાય । સ્થૂલસૂક્ષ્મપ્રદર્શકાય ।
સ્થવિષ્ટાય । સ્થવિરાય । સ્થૂલાય । સ્થાનદાય । સ્થૈર્યાય । સ્થિરાય ।
દાન્તાય । દયાપરાય । દાત્રે । દુરિતઘ્નાય । દુરાસદાય નમઃ । (૪૦૦)

ૐ દર્શનીયાય નમઃ । દયાસારાય । દેવદેવાય । દયાનિધયે ।
દુરાધર્ષાય । દુર્વિગાહ્યાય । દક્ષાય । દર્પણશોભિતાય । દુર્ધરાય ।
દાનશીલાય । દ્વાદશાક્ષરાય । દ્વિષડ્ભુજાય । દ્વિષડ્કર્ણાય ।

દ્વિષડ્ભ્રૂભઙ્ગાય । દીનસન્તાપનાશનાય । દન્દશૂકેશ્વરાય ।
દેવાય । દિવ્યાય । દિવ્યાકૃતયે । દમાય નમઃ । (૪૨૦)

ૐ દીર્ઘવૃત્તાય નમઃ । દીર્ઘબાહવે । દીર્ઘદૃષ્ટયે । દિવસ્પતયે ।
દણ્ડાય । દમયિત્રે । દર્પાય । દેવસિંહાય । દૃઢવ્રતાય ।
દુર્લભાય । દુર્ગમાય । દીપ્તાય । દુષ્પ્રેક્ષાય । દિવ્યમણ્ડનાય ।
દુરોદરઘ્નાય । દુઃખઘ્નાય । દુષ્ટારિઘ્નાય । દિશામ્પતયે ।
દુર્જયાય । દેવસેનેશાય નમઃ । (૪૪૦)

ૐ દુર્જ્ઞેયાય । દુરતિક્રમાય । દમ્ભાય । દૃપ્તાય । દેવર્ષયે ।
દૈવજ્ઞાય । દૈવચિન્તકાય । ધુરન્ધરાય । ધર્મપરાય ।
ધનદાય । ધૃતિવર્ધનાય । ધર્મેશાય । ધર્મશાસ્ત્રજ્ઞાય ।
ધન્વિને । ધર્મપરાયણાય । ધનાધ્યક્ષાય । ધનપતયે ।
ધૃતિમતે । ધૃતિ(ત)કિલ્બિષાય । ધર્મહેતવે નમઃ । (૪૬૦)

ૐ ધર્મશૂરાય । ધર્મકૃતે । ધર્મવિદે । ધ્રુવાય । ધાત્રે ।
ધીમતે । ધર્મચારિને । ધન્યાય । ધુર્યાય । ધૃતવ્રતાય ।
નિત્યોત્સવાય । નિત્યતૃપ્તાય । નિશ્ચલાત્મકાય । નિરવદ્યાય ।
નિરાકારાય । નિષ્કલઙ્કાય । નિરઞ્જનાય । નિર્મયાય । નિર્મનિમેષાય ।
નિરહઙ્કારાય । નિર્મોહાય નમઃ । (૪૮૦)

ૐ નિરુપદ્રવાય નમઃ । નિત્યાનન્દાય । નિરાતઙ્કાય । નિષ્પ્રપઞ્ચાય ।
નિરામયાય । નિરવદ્યાય । નિરીહાય । નિર્દ્વન્દ્વાય । નિર્મલાત્મકાય ।
નિત્યાનન્દાય । નિર્જરેશાય । નિસ્સઙ્ગાય । નિગમસ્તુતાય ।
નિષ્કણ્ટકાય । નિરાલમ્બાય । નિષ્પ્રત્યૂહાય । નિજોદ્ભવાય ।
નિત્યાય । નિયમકલ્યાણાય । નિર્વિકલ્પાય નમઃ । (૫૦૦)

ૐ નિરાશ્રયાય નમઃ । નેત્રે । નિધયે । નૈકરૂપાય । નિરાકારાય ।
નદીસુતાય । પુલિન્દકન્યારમણાય । પુરજિતે । પરમપ્રિયાય ।
પ્રત્યક્ષમૂર્તયે । પ્રત્યક્ષાય । પરેશાય । પૂર્ણપુણ્યાય ।
પુણ્યકારાય । પુણ્યરૂપાય । પુણ્યાય । પુણ્યપરાયણાય । પુણ્યોદયાય ।
પરસ્મૈતિજ્યોતિષે । પુણ્યકૃતે નમઃ । (૫૨૦)

ૐ પુણ્યવર્ધનાય નમઃ । પરાનન્દાય । પરતરાય । પુણ્યકીર્તયે ।
પુરાતનાય । પ્રસન્નરૂપાય । પ્રાણેશાય । પન્નગાય । પવનાશનાય ।
પ્રણતાર્તિહરાય । પૂર્ણાય । પાર્વતીનન્દનાય । પ્રભવે ।

પૂતાત્મને । પુરુષાય । પ્રાણાય । પ્રભવાય । પુરુષોત્તમાય ।
પ્રસન્નાય । પરમસ્પષ્ટાય નમઃ । (૫૪૦)

ૐ પટવે નમઃ । પરિબૃઢાય । પરાય । પરમાત્મને । પરબ્રહ્મણે ।
પરાર્થાય । પ્રિયદર્શનાય । પવિત્રાય । પુષ્ટિદાય । પૂર્તયે ।
પિઙ્ગલાય । પુષ્ટિવર્ધનાય । પાપહારિણે । પાશધરાય ।
પ્રમત્તાસુરશિક્ષકાય । પાવનાય । પાવકાય । પૂજ્યાય ।
પૂર્ણાનન્દાય । પરાત્પરાય નમઃ । (૫૬૦)

ૐ પુષ્કલાય નમઃ । પ્રવરાય । પૂર્વાય । પિતૃભક્તાય । પુરોગમાય ।
પ્રાણદાય । પ્રાણિજનકાય । પ્રદિષ્ટાય । પાવકોદ્ભવાય ।
પરબ્રહ્મસ્વરૂપાય । પરમૈશ્વર્યકારણાય । પરાર્થદાય । પરહિતાય ।
પુષ્ટિકરાય । પ્રકાશાત્મને । પ્રતાપવતે । પ્રજ્ઞાપરાય ।
પ્રકૃષ્ટાર્થાય । પૃથવે । પૃથુપરાક્રમાય નમઃ । (૫૮૦)

ૐ ફણીશ્વરાય નમઃ । ફણિવરાય । ફણાફણિવિભૂષણાય ।
ફલદાય । ફલહસ્તાય । ફુલ્લામ્બુજવિલોચનાય ।
ફટચ્છ(ટાશ)મિતપાપૌઘાય । ફણિલોકવિભૂષણાય ।
બાહુલેયાય । બૃહદ્રૂપાય । બલિષ્ઠાય । બલવતે । બલિને ।
બ્રહ્મેશવિષ્ણુરૂપાય । બુદ્ધયે । બુદ્ધિમતાંવરાય । બાલરૂપાય ।
બૃહદ્ગર્ભાય । બ્રહ્મચારિણે । બુધપ્રિયાય નમઃ । (૬૦૦)

ૐ બહુશ્રુતાય નમઃ । બહુમતાય । બ્રહ્મણ્યાય । બ્રાહ્મણપ્રિયાય ।
બલપ્રમથનાય । બ્રહ્મણે । બ્રહ્મરૂપાય । બહુપ્રદાય ।
બૃહદ્ભાનુતનૂદ્ભવાય । બૃહત્સેનાય । બિલેશયાય । બહુબાહવે ।
બલશ્રીમતે । બહુદૈત્યવિનાશનાય । બિલદ્વારાન્તરાલસ્થાય ।
બૃહચ્છક્તિધનુર્ધરાય । બાલાર્કદ્યુતિમતે । બાલાય ।
બૃહદ્વસસે । બૃહત્તનવે નમઃ । (૬૨૦)

ૐ ભવ્યાય નમઃ । ભોગીશ્વરાય । ભાવ્યાય । ભવનાશનાય ।
ભવપ્રિયાય । ભક્તિગમ્યાય । ભયહરાય । ભાવજ્ઞાય ।
ભક્તસુપ્રિયાય । ભુક્તિમુક્તિપ્રદાય । ભોગિને । ભગવતે ।
ભાગ્યવર્ધનાય । ભ્રાજિષ્ણવે । ભાવનાય । ભર્ત્રે । ભીમાય ।
ભીમપરાક્રમાય । ભૂતિદાય । ભૂતિકૃતે નમઃ । (૬૪૦)

ૐ ભોક્ત્રે નમઃ । ભૂતાત્મને । ભુવનેશ્વરાય । ભાવકાય ।

ભાગ્યકૃતે । ભેષજાય । ભાવકેષ્ટાય । ભવોદ્ભવાય ।
ભવતાપશમનાય । ભોગવતે । ભૂતભાવનાય । ભોજ્યપ્રદાય ।
ભ્રાન્તિનાશનાય । ભાનુમતે । ભુવનાશ્રયાય । ભૂરિભોગપ્રદાય ।
ભદ્રાય । ભજનીયાય । ભિષગ્વરાય । મહાસેનાય નમઃ । (૬૬૦)

ૐ મહોદારાય નમઃ । મહાશક્તયે । મહાદ્ભુતાય (મહાદ્યુતયે) ।
મહાબુદ્ધયે । મહાવીર્યાય । મહોત્સાહાય । મહાબલાય । મહાભોગિને ।
મહામાયિને । મેધાવિને । મેખલિને । મહતે । મુનિસ્તુત્યાય ।
મહામાન્યાય । મહાનન્દાય । મહાયશસે । મહોર્જિતાય । માનનિધયે ।
મનોરથફલપ્રદાય । મહોદયાય નમઃ । (૬૮૦)

ૐ મહાપુણ્યાય નમઃ । મહાબલપરાક્રમાય । માનદાય । મતિદાય ।
માલિને । મુક્તામાલાવિભૂષિતાય । મનોહરાય । મહામુખ્યાય ।
મહર્દ્ધયે । મૂર્તિમતે । મુનયે । મહોત્તમાય । મહોપાયાય ।
મોક્ષદાય । મઙ્ગલપ્રદાય । મુદાકરાય । મુક્તિદાત્રે । મહાભોગાય ।
મહોરગાય । યશસ્કરાય નમઃ । (૭૦૦)

ૐ યોગયોનયે નમઃ । યોગીષ્ઠાય । યમિનાં વરાય । યશસ્વિને ।
યોગપુરુષાય । યોગ્યાય । યોગનિધયે । યમિને । યતિસેવ્યાય ।
યોગયુક્તાય । યોગવિદે । યોગસિદ્ધિદાય । યન્ત્રાય । યન્ત્રિણે ।
યન્ત્રજ્ઞાય । યન્ત્રવતે । યન્ત્રવાહકાય । યાતનારહિતાય ।
યોગિને । યોગીશાય નમઃ । (૭૨૦)

ૐ યોગિનાં વરાય નમઃ । રમણીયાય । રમ્યરૂપાય । રસજ્ઞાય ।
રસભાવકાય । રઞ્જનાય । રઞ્જિતાય । રાગિણે । રુચિરાય ।
રુદ્રસમ્ભવાય । રણપ્રિયાય । રણોદારાય । રાગદ્વેષવિનાશકાય ।
રમ્યાર્ચિરુચિરાય । રમ્યાય । રૂપલાવણ્યવિગ્રહાય । રત્નાઙ્ગધરાય ।
રત્નાભૂષણાય । રમણીયકાયાય । રુચિકૃતે નમઃ । (૭૪૦)

ૐ રોચમાનાય નમઃ । રઞ્જિતાય રોગનાશનાય । રાજીવાક્ષાય ।
રાજરાજાય । રક્તમાલ્યાનુલેપનાય । ઋગ્યજુસ્સામસંસ્તુત્યાય ।
રજસ્સત્વગુણાન્વિતાય । રજનીશકલારમ્યાય । રત્નકુણ્ડલમણ્ડિતાય ।
રત્નસન્મૌલિશોભાઢ્યાય । રણન્મઞ્જીરભૂષણાય । લોકૈકનાથાય ।
લોકેશાય । લલિતાય । લોકનાયકાય । લોકરક્ષકાય । લોકશિક્ષાય ।
લોકલોચનરઞ્જિતાય । લાવણ્યવિગ્રહાય નમઃ । (૭૬૦)

ૐ લોકચૂડામણયે નમઃ । લીલાવતે । લોકાધ્યક્ષાય । લોકવન્દ્યાય ।
લોકોત્તરગુણાકરાય । લોકબન્ધવે । લોકધાત્રે । લોકત્રયમહાહિતાય ।
વરિષ્ઠાય । વરદાય । વન્દ્યાય । વિશિષ્ટાય । વિક્રમાય ।
વિભવે । વિબુધાગ્રચરાય । વશ્યાય । વિકલ્પવર્જિતાય ।
વિપાશાય । વિગતાતઙ્કાય । વિચિત્રાઙ્ગાય નમઃ । (૭૮૦)

ૐ વિરોચનાય નમઃ । વિદ્યાધરાય । વિશુદ્ધાત્મને । વેદાઙ્ગાય ।
વિબુધપ્રિયાય । વચસ્કરાય । વ્યાપકાય । વિજ્ઞાનિને ।
વિનયાન્વિતાય । વિદ્વત્તમાય । વિરોધઘ્નાય । વીરાય ।
વિગતરાગવતે । વીતભાવાય । વિનીતાત્મને । વેદગર્ભાય ।
વસુપ્રદાય । વિશ્વદીપ્તયે । વિશાલાક્ષાય । વિજિતાત્મને નમઃ । (૮૦૦)

ૐ વિભાવનાય નમઃ । વેદવેદ્યાય । વિધેયાત્મને । વીતદોષાય ।
વેદવિદે । વિશ્વકર્મણે । વીતભયાય । વાગીશાય । વાસવાર્ચિતાય ।
વીરધ્વંસકાય । વિશ્વમૂર્તયે । વિશ્વરૂપાય । વરાસનાય ।
વિશિખાય । વિશાખાય । વિમલાય । વાગ્મિને । વિદુષે । વેદધરાય ।
વટવે નમઃ । (૮૨૦)

ૐ વીરચૂડામણયે નમઃ । વીરાય । વિદ્યેશાય । વિબુધાશ્રયાય ।
વિજયિને । વેત્રે । વરીયસે । વિરજસે । વસવે । વીરઘ્નાય ।
વિજ્વરાય । વેદ્યાય । વેગવતે । વીર્યવતે । વશિને । વરશીલાય ।
વરગુણાય । વિશોકાય । વજ્રધારકાય । શરજન્મને નમઃ । (૮૪૦)

ૐ શક્તિધરાય નમઃ । શત્રુઘ્નાય । શિખિવાહનાય । શ્રીમતે ।
શિષ્ટાય । શુચયે । શુદ્ધાય । શાશ્વતાય । શ્રુતિસાગરાય ।
શરણ્યાય । શુભદાય । શર્મણે । શિષ્ટેષ્ટાય । શુભલક્ષણાય ।
શાન્તાય । શૂલધરાય । શ્રેષ્ટાય । શુદ્ધાત્મને । શઙ્કરાય ।
શિવાય નમઃ । (૮૬૦)

ૐ શિતિકણ્ઠાય નમઃ । શૂરાય । શાન્તિદાય । શોકનાશનાય ।
ષણ્મુખાય । ષડ્ગુણૈશ્વર્યસંયુતાય । ષટ્ચક્રસ્થાય ।
ષડૂર્મિઘ્નાય । ષડઙ્ગશ્રુતિપારગાય । ષડ્ભાવરહિતાય ।
ષડ્ગુણાય । ષટ્છાસ્ત્રસ્મૃતિપારગાય । ષડ્વર્ગદાત્રે ।
ષડ્ગ્રીવાય । ષડરિઘ્નાય । ષડાશ્રયાય । ષટ્કિરીટધરાય
શ્રીમતે । ષડાધરાય । ષટ્ક્રમાય । ષટ્કોણમધ્યનિલયાય નમઃ । (૮૮૦)

ૐ ષણ્ઢત્વપરિહારકાય નમઃ । સેનાન્યે । સુભગાય । સ્કન્દાય ।
સુરાનન્દાય । સન્તાં ગતયે । સુબ્રહ્મણ્યાય । સુરાધ્યક્ષાય ।
સર્વજ્ઞાય । સર્વદાય । સુખિને । સુલભાય । સિદ્ધિદાય । સૌમ્યાય ।
સિદ્ધોદાય । । સિદ્ધેશાય । સિદ્ધિસાધનાય । સિદ્ધાર્થાય ।
સિદ્ધસઙ્કલ્પાય । સિદ્ધસાધનાય । સુરેશ્વરાય નમઃ । (૯૦૦)

ૐ સુભુજાય નમઃ । સર્વદૃશે । સાક્ષિણે । સુપ્રસાદાય । સનાતનાય ।
સુધાપતયે । સ્વયઞ્જ્યોતિષે । સ્વયમ્ભુવે । સર્વતોમુખાય ।
સમર્થાય । સમક્ષિણે । સત્કૃતયે (સત્કૃતતે) । સૂક્ષ્માય ।
સુઘોષાય । સુખદાય । સુહૃદે । સુપ્રસન્નાય । સુરશ્રેષ્ઠાય ।
સુરશીલાય । સત્યસાધકાય । સમ્ભાવ્યાય નમઃ । (૯૨૦)

ૐ સુમનસે નમઃ । સેવ્યાય । સકલાગમપારગાય ।
સુવ્યક્તાય । સચ્ચિદાનન્દાય । સુવીરાય । સુજનાશ્રયાય ।
સર્વલક્ષણસમ્પન્નાય । સત્યધર્મપરાયણાય । સર્વદેવમયાય ।
સત્યાય । સદામૃષ્ટાન્નદાયકાય । સુધાપાય । સુમતયે । સત્યાય ।
સર્વવિઘ્નવિનાશકાય । સર્વદુઃખપ્રશમનાય । સુકુમારાય ।
સુલોચનાય । સુગ્રીવાય નમઃ । (૯૪૦)

ૐ સુધૃતયે નમઃ । સારાય । સુરારાધ્યાય । સુવિક્રમાય ।
સુરારિઘ્નાય । સ્વર્ણવર્ણાય । સર્પરાજાય । સુદાશુચયે ।
સપ્તાર્ચિર્ભુવે । સુખદાય । સર્વયુદ્ધવિશારદાય ।
હસ્તિચર્માંમ્બરસુતાય । હસ્તિવાહનસેવિતાય ।
હસ્તચિત્રાયુધધરાય । હતાઘાય । હસિતાનનાય । હેમભૂષાય ।
હરિદ્વર્ણાય । હૃષ્ટિદાય । હૃષ્ટિવર્ધનાય નમઃ । (૯૬૦)

ૐ હેલાદ્રિભિયે નમઃ । હંસરૂપાય । હુઙ્કારહતકિલ્બિષાય ।
હિમાદ્રિજાતનુભવાય । હરિકેશાય । હિરણ્યમયાય । હૃદ્યાય ।
હૃષ્ટાય । હરિસખાય । હંસગતયે । હંસાય । હવિષે ।
હિરણ્યવર્ણાય । હિતકૃતે । હર્ષદાય । હેમભૂષણાય ।
હરિપ્રિયાય । હિતકરાય । હતપાપાય । હરોદ્ભવાય નમઃ । (૯૮૦)

ૐ ક્ષેમદાય । ક્ષેમકૃતે । ક્ષેમ્યાય । ક્ષેત્રજ્ઞાય ।
ક્ષામવર્જિતાય । ક્ષેત્રપાલાય । ક્ષમાધરાય ।
ક્ષેમક્ષેત્રાય । ક્ષમાકરાય । ક્ષુદ્રઘ્નાય ।

ક્ષાન્તિદાય । ક્ષેમાય । ક્ષિતિભૂષાય । ક્ષમાશ્રયાય ।
ક્ષાલિતાઘાય । ક્ષિતિધરાય । ક્ષીણસારરક્ષણેક્ષણાય ।
ક્ષણભઙ્ગુરસન્નદ્ધઘનશોભિકપર્દકાય ।
ક્ષિતિભૃન્નાથતનયામુખપઙ્કજભાસ્કરાય । શ્રીગુહાય નમઃ । (૧૦૦૦)

અધોમુખપૂજનં સમ્પુર્ણમ્ ।
ઇતિ ષણ્મુખસહસ્રનામાવલિઃ સમ્પૂર્ણા ।
ૐ શરવણભવાય નમઃ ।
ૐ તત્સત્ બ્રહ્માર્પણમસ્તુ ।

Encoded by Sivakumar Thyagarajan shivakumar24 at gmail.com
Proofread by Sivakumar Thyagarajan, PSA Easwaran

ShaNmukhArchana as a way of worship is founded upon the tattva (principle) that Shiva and Shanmukha are one and the same.

Shiva mandated that Brahma, Vishnu and Rudra would all be of the same status - they were essentially of the manifestations of His origin. They would carry out 'Panchakrutya' or Five Duties, viz., Srishti' (Creation), 'Sthiti' (Preservation) and 'Laya' (Destruction), 'Tirobhav' (Concealment and Revival) and 'Anugraha' (Providing Salvation). Srishti would be performed by Brahma, Sthiti by Vishnu, and Laya by Rudra; the fourth task, viz. Tirobhav would be performed by Mahesha, who would be yet His fourth manifestation and finally the most significant task of Anugraha would be the exclusive dispensation by Himself. [shivapurANA].

The manifestation of these forms of Shiva

may be called as IshAna, tatpuruSha, aghora, vAmadeva and sadyojAta. To perceive, visualize, and conceptualize these manifestations, we worship the Linga in four directions as four faces and one on the top, making it five murti-s. These five faces seem to be apparent and patently known to us. However, as we advance, we realize that “parabrahma” has no form and is beyond description and conceptualization; we worship the brahma tattva through the sixth (antar-adho) mukham that is latent and inside the Linga. These six mukhams are the six faces of Lord Subrahmanya. Hence the ShaNmukhArchanA covers the sahasranAmAvali for the five faces and that of adhomukham which can be realised only through samAdhi.

The nAmAvali-s of the sixth face are couched and formulated as “matrukAkShara” from a to kSha, forming an exclusive and indispensable part of ShaNmukhArchanA. [There may be some variations - some texts contain as many as 1200 nAmAvali-s].

Many of these nAmAvali-s are propounded by the vedA-s. The 300 names in Rudra anuvAkam and those extolling the exalted and enlightened status of the Lord are found in the nAmAvali-s that a discerning upAsakA would be prompted to recall the lines in shri viShNu sahasranAma and others. After all, when we say “parabrahma”, there is no distinction amongst the murti-s; all are one and the

same. Hence, to reflect His eternal beauty and execution of panchakrutya. these namavali-s aptly and appropriately reveal and portray vividly the leelAvatara or appearance of Shri Guha. (by Shri Radhakrishna Sastrigal in Tamil. Translated by Sivakumar Thyagarajan).

---

*Shri Shanmukha or AdhomukhasahasranamavaliH 6*

pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*